International Journal of Sanskrit Research 2014; 1(1): 55-57

International Journal of Sanskrit Research

अनन्ता

ISSN Number: 2394-7519
IJSR 2014; 1(1): 55-57
© 2014 IJSR
www.anantaajournal.com
Received: 19-09-2014
Accepted: 25-10-2014

डॉ० सुनील कुमार झा
साहित्य विभाग, बाबासाहेब रामकृष्ण संस्कृत महाविद्यालय, पचमढ़ी, दरभंगा, बिहार, भारत

Correspondence
डॉ० सुनील कुमार झा
साहित्य विभाग, बाबासाहेब रामकृष्ण संस्कृत महाविद्यालय, पचमढ़ी, दरभंगा, बिहार, भारत

# उपमा कालिदासस्य

## डॉ० सुनील कुमार झा

प्रस्तावना
कवेः कवित्वम्– संस्कृतकाव्यजगति कवितावनितायाः विलासस्वरूपः महाकविः कालिदासः सरस्वत्याः साक्षाद्वतारः एव। विक्रमादित्यस्य नवरत्नेषु अन्यतमोऽयमस्ति। कालिदासस्य काव्यसौन्दर्य, कलाकौशलं रसिकान् हृदयान् आवर्जयति। महाकवेः काव्य– सौन्दर्य दर्श – दर्श सहृदयाः तस्य कला–कौशलं बारम्बारं प्रशंसन्ति। महाकविकालिदासस्य काव्येषु प्रयुक्ताः सूक्तयः सहृदयहृदयानां आवर्जकाः सन्ति। विशेषतः कालिदासस्य उपमानां प्रयोगः लोकोत्तरानन्दायकः भवति। अस्य महाकवेः काव्येषु बहूनि वैशिष्ट्यानि सन्ति। यथा–अलंकारप्रयोगे दक्षता, सहजस्वभाविक–वर्णन–क्षमता, सूक्ष्ममर्मज्ञता, प्रसादगुण– वैदर्भीरीतिसंयुक्तता, रस–प्रयोगे परिपक्वता, इत्यादयः वैशिष्ट्यानि सहसैव रसरसिक–चेतसां चेतांसि चमत्करोति। हर्षचरिते (1/16) बाणभट्टेन उच्यते–

निर्गतासु न वा कस्य कालिदासस्य सूक्तिषु।
प्रीतिर्मधुरसान्द्रासु मञ्जरीष्विव जायते।। (हर्षचरिते (1/16)

अलंकारः– ' काव्यशोभाकरान् धर्मान् अलंकारान् प्रचक्षते इति दण्डीवचनेन सिध्यति यत् यथा कामिनी हाराद्याभूषणैः सुशोभिता प्रतीयते तथैव कविताकामिन्याः शोभा अपि अलङ्कारैः द्विगुणिता भवति। उक्तमपि–

उपकुर्वन्ति तं सन्तं येऽङ्गद्वारेण जातुचित्।
हारादिवदलङ्कारास्तेऽनुप्रासोपमादयः।। (काव्यप्रकाशः)

अर्थगाम्भीर्यपदलालित्य–अलंकारयोजनानां सुन्दरसमन्वयः एव काव्यस्यादर्शः। कालिदासस्य काव्ये सर्वेषामेव अलङ्काराणां प्रयोगः कृतः विद्यते। वस्तुतः उपमाप्रयोगविषये अयं कविकुलगुरुः सर्वोत्कृष्टतां भजते। अतः साधूच्यते–उपमा कालिदासस्य।

उपमायाः स्वरूपम् – का नाम उपमा ? कथं चैषा काव्यस्य उपकर्त्री ? कथं च एषा सहृदयानां कृते आनन्ददायिनी ? एते प्रश्नाः विवेचनीयाः अस्माभिः। एकस्मिन् वाक्ये वस्तुद्वयस्य वैधर्म्यं विहाय साम्यमात्रं चेद् उच्यते तर्हि सा उपमा। अर्थात् प्रस्तुतवस्तूनां अप्रस्तुतवस्तुभिः वैधर्म्यं विहाय साधर्म्यमाध्यमेन या तुलना क्रियते एकस्मिन् वाक्ये सा एव उपमारूपे कथ्यते। एषा उपमा काव्येषु आगत्य तेषु काव्येषु ईदृग्विधान् हृदयावर्जकान् गुणान् जनयति यैः गुणैः पाठकानां श्रोतृणां च मनसि तेषां काव्यानां वारम्वारश्रवणेच्छा जायते। उपमायाः प्रयोगेण काव्ये यद् विशिष्टसौन्दर्यं जायते तेन सौन्दर्येण रसज्ञाः आनन्दम् अनुभवन्ति। रघुवंशमहाकाव्यस्य मङ्गलाचरणे कविना पार्वत्याः वाचा सह सादृश्यं मनोरमं स्थापितम्–

वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये।
जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ।। (रघु. 1/1)

अयं श्लोकः उपमायाः मनोभावनं उदाहरणम् अस्ति। अस्मिन् श्लोके पार्वती–शङ्करयोः प्रार्थयन् महाकविकालिदासः स्वमहाकाव्यस्य रघुवंशस्य समारम्भं करोति। पार्वती शङ्करश्च तथैव एकरूपौ दृश्येते यथा शब्दार्थौ परस्परं एकरूपौ दृश्येते। यथा शब्दार्थौ परस्परं संश्लिष्टौ वर्तते तथैव पार्वतीशङ्करौ अपि। अत्र शब्दार्थौ उपमानरूपेण, भवानीशङ्करौ च उपमेयरूपेण वर्तते।

विश्वनाथानुसारम्–साम्यं वाच्यमवैधर्म्यं वाक्यैक्य उपमा द्वयोः (सा. दर्पण. 1/14) एकस्मिन् वाच्यमवैधम्म वैधर्म्यं विहाय साम्यमात्रं चेद् उच्यते सा उपमा। कालिदासस्य काव्ये उपमालङ्कारस्य समावेशोऽनायास एव भवति। तस्य उपमा विश्वप्रसिद्धा विद्यते। उक्तमपि–

उपमा कालिदासस्य भारवेरर्थगौरवम्।
दण्डिनः पदलालित्यं माघे सन्ति त्रयो गुणाः।।
(सु.र.भ. 37/63)

संस्कृतसाहित्याकाशे उपमायाः प्रयोगसम्बन्धे कालिदासस्य महती ख्यातिः। यथा–

उपमैका शैलूषीव सम्प्राप्ता चित्रभूमिका भेदात्।
एजयन्ती काव्यरङ्गे नृत्यन्ती तद्विदां चेतः।।

महाकवेः काव्यसौन्दर्यं दृष्ट्वा सहृदयाः तस्य कला–कौशलं वारम्वारं प्रशंसन्ति। महाकविकालिदासस्य काव्येषु प्रयुक्ताः सूक्तयः सहृदयहृदयानां आवर्जकाः सन्ति। 'महाकवि बाण' नाम काव्यरसिकेन तु तस्य सूक्तिषु मञ्जरीणां मादकता अनुभूता, मुक्तहृदयेन च हर्षचरिते प्रशस्ताः–

निर्गतासु न वा कस्य कालिदासस्य सूक्तिषु।
प्रीतिर्मधुरसान्द्रासु मञ्जरीष्विव जायते।। (हर्षचरिते)

दीपशिखा–कालिदासः– रघुवंशमहाकाव्ये इन्दुमत्याः स्वयंवरावसरे पतिंवरायाः इन्दुमत्याः उपमा महाकविना सञ्चारिणी दीपशिखया सह प्रदत्ता। अनया उपमया तु कविकुलशिरोमणिः एषः दीपशिखा कालिदासः इति प्रसिद्धिमवाप।

सञ्चारिणी दीपशिखेव रात्रौ यं यं व्यतीयाय पतिंवरा सा।
नरेन्द्रमार्गाट्ट इव प्रपेदे, विवर्णभावं स स भूमिपालः।। (रघु. 6/67)

अनेन उपमाप्रयोगसौन्दर्यणैव कालिदासः 'दीपशिखा कालिदासः' इति कथ्यते।
उपमा कालिदासस्य – अस्य कविप्रवरस्य कृतिषु उपमाप्रयोगस्थलानि शतशः सन्ति। सर्वाधिक्यं तु उपमाप्रयोगस्य रघुवंशमहाकाव्ये दृश्यते। तस्या उपमाश्चतुर्धा विभाजितुं शक्यन्ते। 1. शास्त्रीय–उपमा, 2. मूर्तस्य–अभूर्तत्त्वेन साम्योपमा, 3. प्रकृति–सम्बद्धाः उपमा, 4. विविधविषयसम्बद्धाः उपमा।
(1) शास्त्रीय–उपमा – वस्तुतः कालिदासस्य विविधानां शास्त्राणां ज्ञानं महद् आसीत्। अनेन यज्ञ–दर्शन–ज्योतिष–वेद–व्याकरण – राजनीति – विद्यादि अनेकशास्त्रसम्बद्धाः उपमाः प्रयुक्ताः। सा शास्त्रीय–उपमा। यथा वेदविषयका इयं उपमा वर्तते –

आसीन्महीक्षितामाद्यः प्रणवश्छन्दसामिव (रघुवंशे)

रघुवंशस्य प्रथमाध्याये कविना उक्तम्। यत् मनुः तथैव नृपाणां अग्रगण्यः बभूव यथा मन्त्राणां प्रणवः ओङ्कारः अग्रगण्यः अस्ति।
(क) यज्ञविषयकाः अभिज्ञानशाकुन्तस्य चतुर्थेऽङ्के महर्षिकण्वस्य अस्यां उक्तौ कवेः यज्ञविषयकं ज्ञानं प्रतिभाति, उपमा च अतीव मनोरमा सञ्जाता –
दिष्ट्या धूमाकुलितदृष्टेरपि यजमानस्य पावक एवाहुतिः पतिता। (शाकु. अंक 4)
(ख) दर्शनविषयकाः – यथा बुद्धेः कारणम् अव्यक्तं मूलप्रकृतिर्वा, तथा सरयूनद्याः कारणं मानसं सरः।

ब्राह्मं सरः कारणमाप्तवाचो बुद्धेरिवाव्यक्तमुदाहरन्ति। (रघु. 13/60)

अस्मिन् श्लोके कविः सांख्यदर्शनस्य सिद्धान्तस्य वर्णनं कृतवान्। अव्यक्ताद् बुद्धिः जायते। बुद्धेः अहंकारः, अहंकाराद् अन्ये पदार्थाः जायन्ते। अव्यक्तमेव जगतः मूलकारणं वर्तते।

(ग) ज्योतिषविषयकाः –एवमेव दुर्वाससः शापस्य अन्ते शकुन्तला कथं दुष्यन्तेन सह मिलिता इति उपमा माध्यमेन कविः एवं कथितवान् –

उपरागान्ते शशिनः समुपगता रोहिणी योगम्। (शाकु. 7/22)

अर्थात् यथा चन्द्रग्रहणानन्तरं रोहिणी शशिनम् उपैति तथैव शकुन्तला दुष्यन्तमुपगता।

(घ) वेदविषयकाः यथा –

आसीन्महीक्षितामाद्यः प्रणवश्छन्दसामिव। (रघु. 1/11)

रघुवंशस्य प्रथमाध्याये कविना उक्तं यत् मनुः तथैव नृपाणां अग्रगण्यः बभूव यथा–मन्त्राणां प्रणवः – ओङ्कारः अग्रगण्यः अस्ति।

(ङ) व्याकरणविषयकाः यथा –

अपवाद इवोत्सर्गं व्यावर्तयितुमीश्वरः।। (रघु0 15/7)

पश्चादध्ययनार्थस्य धातोरधिरिवाभवत्।। (रघु0 15/9)

व्याकरणशास्त्रे अपवादः उत्सर्गं बाधते तथैव कुमारशत्रुघ्नः संग्रामे लवणासुरं बबाधे। 'अधि' उपसर्गपूर्वक 'इङ्' धातोः अध्ययनार्थकात् यथा शोभाकृद् व्यर्थश्च तथा शत्रुघ्नेन समं सेना शोभाकृद् व्यर्थश्च स्यात्।

(च) राजनीतिविषयकाः – शक्तित्रयं (प्रभाव–मन्त्र–उत्साह) यथा अक्षममर्थं सूते तथा सुदक्षिणा पुत्रं रघुम् असूत। एवं वाल्मीकि – आश्रमे सीता लवकुशौ तथैव अजनयद् यथा क्षितिः सम्पन्नौ कोशदण्डाविव।

असूत पुत्रं समये शचीसमा त्रिसाधना शक्तिरिवार्थमक्षयम्।
(रघु0 3/13)

सुतावसूत संपन्नौ कोशदण्डाविव क्षितिः। (रघु0 15/13)

(छ) विद्याविषयकाः – विद्या यथा अभ्यासेन चकास्ति तथा नन्दिनी सेवया प्रसादनीया। एवं च दुष्यन्तपरिणीता शकुन्तला सुशिष्यप्रदत्ता विद्येवाशोचनीयाऽभूत्। यथा –

विद्यामभ्यसनेनेव प्रसादयितुमर्हसि।। (रघु0 1/88)

सुशिष्यपरिदत्ता विद्येवाशोचनीयाऽसि संवृत्ता।
(अभि.शाकु. अंक–4)

(ज) मनोवैज्ञानिकीविषयता – यथा –
गच्छति पुरः शरीरं धावति पश्चाद् असंस्तुतं चेतः।
चीनांशुकमिव केतोः प्रतिवातं नीयमानस्य।। (अभिज्ञा.शा.)
यदा दुष्यन्तः आश्रमवासिनां कष्टापनोदनकरणार्थं सखीशकुन्तलातः पृथग् भूत्वा तपोवनं प्रतिगच्छति, स वदति मम

शरीरं तु अग्रे याति परन्तु मनस्तु माम् अपरिचितं मत्वा पश्चादेव धावति यथा चीनांशुकं यद् वायोः विपरीतदिशायां बलाद् नीयमानेऽपि पश्चादेव पलायते। उपमा इयं कवेः मनोवैज्ञानिककल्पनायाः चरमोत्कर्षो विद्यते।

(2) मूर्तस्य–अमूर्तत्त्वेन साम्योपमा – कविकुलगुरुकालिदासः प्रायशो मूर्तस्य मूर्तत्त्वेन साम्यं प्रदर्शयति। क्वचिच्च मूर्त–अमूर्त, सजीव–निर्जीव, भाव–अभावपदार्थेन औपम्यं प्रतिपादयति।

(3) प्रकृति–सम्बद्धाः उपमा – महाकविकालिदासस्य अभिज्ञानशाकुन्तलं तु ईदृशीनां उपमानाम् आगारमेव विद्यते। यथा–ललनाललामभूतां शकुन्तलां वीक्ष्य दुष्यन्तः कथयति –

अधरः किसलयरागः कोमलविटपानुकारिणौ बाहू।
कुसुममिव लोभनीयं यौवनमङ्गेषु सन्नद्धम्।। (शाकु. 1/21)

अत्र शकुन्तलायाः अधरस्य उपमा नवपल्लवरागेण सह प्रदत्ता, तस्याः बाहुयुगलस्य उपमा कोमलेन शाखाद्वयेन सह प्रस्तुता, तस्याः शरीरावयवेषु या युवावस्था विराजते सा तु नवकुसुममिव मनोहरं रमणीयञ्च वर्तते।

संदर्भः

1. रघुवंशम् – 6.67
2. पूर्वमेघः–
3. अभिज्ञानशाकुन्तलम् – 1.31
4. अभिज्ञानशाकुन्तलम् – 2.8
5. अभिज्ञानशाकुन्तलम् – 3.8